789

Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ७८६ - ब

Title रघुवंश द्वितीयसर्गटीका

Author समयसुन्दरः

Extent ८ .... Age ....

Subject काव्यशास्त्रम् । अपूर्णम् ।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ७८९-घ

रघुवंशद्वितीयसर्गटीका

अर्थालापनिकाख्या (का० व्याकरणशास्त्र)

व्याख्याता समयसुन्दरः

नं० ७८९-घ

पत्राणि ८ (अपूर्णम्)

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

॥श्रीगणेशाय नमः॥ अथ द्वितीयसर्गस्यार्थोल्लापनिका प्रारभ्यते अथेति। अथानंतरं प्रभाते प्रातःकाले यश एव धनं यस्य सः नरेन्द्रः प्रजानामधिपः ई-
श्वरो दिलीपः सुदक्षिणस्य धेनुं वनाय वनं गंतुं मुमोच क्रियार्थोपपदस्य कर्मणि चतुर्थी कीदृशीं धेनुं जायया सुदक्षिणया प्रतिग्राहिते स्वीकारिते गंधमाल्ये चं-
दनपुष्पस्रजौ यस्याः सा जा॰ वा तीप्रतिग्राहिपित्रा सुदक्षिणप्रतिग्राहिता हवी धेनुः स्त्री दत्तपुष्पग्रहणेनानुकूलत्वाज्ञविज्ञी कार्यसिद्धिः अत एव वानेन प्रयु-
क्तं जायापदं न पाणिग्रहणादिः तं जायाया भवति पदस्यां जायते पुनरिति तत्पापीतं पाने भवति कः तदस्यास्तीत्यर्थे सादिपागन्मन्वर्थी यो मत्वर्थस्य पीतो वा पीतागावो
भुक्ता ब्राह्मणा इति महाभाष्यकारवचनात् कर्तरि वा आदिकर्मणि वा पाठमुपक्रान्तः अर्जमावितत्वं तत्त्वेन इते इति वा पूर्वं पीतः वत्सो वत्सो वत्सो यस्याः
सा तां पीतप्रतिबद्धेति पूर्वकालेनेति समासः मल्लीपुष्पेष्वि पुष्पदा मीमि बैजयेती यशोधनपदेन स्वदेहदानेऽपि तस्येति। मनुष्येश्वरधर्मपत्नी मनुष्याणां
ईश्वरः मनुष्येश्वरः मनुष्येश्वरस्य धर्मपत्नी मनुष्येश्वरधर्मपत्नी तस्याः धेनोः मार्गं अन्वगच्छत् अनुगच्छति स्म ॥ किंभूतं मार्गं खुरन्यासपवित्रपांसुं खु-
रन्यासेन पवित्राः पांसवो धूलिनिकराः यस्य स खुरन्यासपवित्रपांसुस्तं खुरन्यासपवित्रपांसुं किंभूता धर्मपत्नी अपांसुलानां पतिव्रतानां धुरि अग्रे
कीर्तनीया सा केव स्मृतिरिव यथा स्मृतिः श्रुतेः अर्थं अनुगच्छति। २। स॰ स राजा दिलीपः तां सौरभेयीं गां जुगोप ररक्ष किं कृत्वा दयितां प्रियां निवर्त्य
किंभूतो राजा दयालुः दयापरायणः पुनः किंभू॰ राजा यशोभिः सुरभिः किंभूतां धेनुं पयोधरीभूतचतुःसमुद्रां अपयोधराः पयोधरीभूताः
चत्वारः समुद्रा यस्याः सा पयोधरीभूतचतुःसमुद्रा तां पय॰ उपेक्ष्यते नाकामिव गोरूपधारिणीं उर्वीमिव। ३। व्रतेति। तेन धेनोः अनुचरेण सेवकेन
शेषः समस्तः अनुयायिवर्गः सेवकवर्गः न्यषेधि कस्मै व्रताय तस्य राज्ञो दिलीपस्य शरीररक्षा अन्यतः अन्यस्मान्न युक्ता यस्मान्मर्त्यः किं य-
स्मात्कारणात् मनोः प्रसूतिः स्ववीर्यगुप्ता रक्षिता। ४। स इति। कोऽर्थः। येन एकराजसूयेन मंडलेश्वरस्य यः शास्ति यज्ञोऽत्र यारातः स सम्राडुपराज-
कः। स सम्राट् तस्याः धेनोः समाराधनतत्परो भूत् बभूव कैः तृणानां कवलैः कथंभूतैस्तृणानां कवलैः आस्वादवद्भिः आस्वादो विद्यते येषां ते आ-
स्वादवंतः तैः। पुनः कैः कंडूयनैः खर्जूभिः च पुनः दंशनिवारणैः दंशानां निवारणानि दंशनिवारणानि तैः। किं विशिष्टायाः तस्याः धेनोः अव्या-
हतस्वैरगतेः अव्याहतानि अप्रतिहतानि स्वैराणि स्वच्छंदवर्तिनी गतिर्यस्याः सा अव्याहतस्वैरगतिः तस्याः। अव्याहतस्वैरगतेरित्यपि पाठः।५। स्थितेति इ-
ति दिलीपः तां धेनुं प्रति अन्वगच्छत् का इव छाया इव यथा छाया शरीरं अनुगच्छति किं कुर्वन् अन्वगच्छत् इत्याह स्थितां धेनुं पश्यन् राजापि स्थितः
॰प्रयातां धेनुं प्रचलितां धेनुं पश्यन् राजापि उच्चलितः चलितः निषादुषीं उपविष्टां धेनुं पश्यन् राजापि आसनबंधधीरो जातः आसनबंधे धीरः स्थिरः।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नवेधधीरः कापि मासनवासनस्स धीरत्यपि पाठः स धेनुं जलं आदत्तानां गटकिनी राजापि पपौ तज्जलाभिजानः॥६॥ स्थितः स्थितामिति॰ सद्विपेंद्र
इव गजइव आसीत् किं कुर्वाणः राज्यलक्ष्मीं दधानः तें किंभूतां राज्यलक्ष्मीं न्यस्तचिह्नां अपि त्यक्तछत्रचामरादिचिह्नामपि किंभूतां राज्यलक्ष्मीं ते
जोविशिष्टानुमितां तेजोविशेषेण देहदीप्त्या अनुमिता तेजोविशेषानुमिता तां ते॰ किंविशिष्टो द्विपेंद्रः अनाविःकृतदानराजिः अनाविःकृता न प्रक
टीकृता दानस्य मदस्य राजिश्रेणिर्येन सः॰ पुनः किंभूतः द्विपेंद्रः अंतर्मदावस्थः अंतर्मध्ये मदस्य अवस्था यस्य सः अंत॰॥७॥ लतेति॰। स राजा दि
लीपः दाववनं चरति विचरति स्म कस्मात् गुरुहोमधेनोः गुरोः वशिष्ठस्य होमार्थं याधेनुः तस्याः रक्षणोपदेशात् रक्षणलात् किं कुर्वन् इव दुष्टसत्वान्व्या
घ्रान् विनेष्यन्निव शिक्षयिष्यन्निव किं वि॰ सः केशैः उपलक्षित इति शेषः किंभूतैः केशैः लताप्रतानोद्ग्रथितैः लतानां प्रतानानां निलं॰ लताप्रतानैरुद्
ग्रथिताः लताप्रतानोद्ग्रथिताः तैः ल॰ किं॰ राजा अधिज्यधन्वा अधिज्यं आरूढं धनुर्यस्य सः अधिज्यधन्वा ताडितधनुष्कः॥८॥ विसृष्टेति॥ तस्य दि
लीपस्य राज्ञः पार्श्वद्रुमाः समीपवर्तिनो वृक्षाः वोल्लेदाते आलोकशब्दं जयशब्दं उदीरयामासुरिव कैः कृत्वा। वयसां पक्षिणां
विरावैः शब्दैः किंभूतानां वयसां उन्मदानां उन्मत्तानां उत्तप्यापि वैसा हृष्टोत् मदोयेषां ते उन्मदास्तेषां उन्मदानां किंभूतस्य तस्य विसृष्टपार्श्व
अनुचरस्य विसृष्टाः त्यक्ताः अनुचराः येन सः वि॰ तस्य॰ पुनः किं॰ तस्य पाशभृतो वरुणेन समस्य तुल्यस्य वरुणवत् जलवत् वनस्पतीनामधिपस्य तस्या
महिम्न इति। वाललताः तं राजानं प्रसूनैः पुष्पैः अवाकिरन् अभ्यवर्षन् काः कैः कमिव इव यथा पौरकन्याः पुरे नगरे भवाः पौराः पौराश्चताः कन्याश्च
पौरकन्याः आचारलाजैः राजानं अभिवर्षन्ति। किं॰ बाललताः मरुत्प्रयुक्ताः मरुता वायुना प्रयुक्ताः प्रेरिताः मरुत्प्रयुक्ताः। किं॰ मरुत्प्र॰ कि
किं तं अर्च्यं अर्चार्हं पूज्यं पुनः किंभूतं तं आरात् समीपात् अभिवर्तमानं॥१०॥ धनुर्भृत इति। हरिणांगनाः हरिण्यः अवेक्ष्यणां प्रकामविस्तारफलं आयुः प्रा
पुः प्रकामं अतिशयेन विस्तारस्य फलं नेत्रस्य वनेहत्त्वपस्य अभावात् अद्यैव साफल्यमिति किं कुर्वंत्यः अस्य राज्ञः वपुर्विलोकयंत्यः किं वि॰ वपुः धनुर्भृतोप्यस्य
अंतःकरणैः चेतोभिः विशंकैः शंकारहितैः दयार्द्रभावप्रतिभाख्याति दयापरस्वरूपं सूचयतीति। स राजा दिलीपः स्वं यशः कुंजेषु गायमानं कि॰ व
नदेवताभिः उच्चैः अतिशयेन उद्गीयमानं पुनः किं॰ यशः कीचकैः सच्छिद्रवंशैः उत्पादितवंशशब्दस्य वेणोः कृतसंकाशं यत्र अन्तर
उत्पा॰ तत उत्पा॰ किंभूतैः स कीचकैः मारुतपूर्णरंध्रैः [illegible] मारुतपूर्णरंध्राः तैः मारुतपूर्णरंध्रैः
नि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रोपणकीचकप्रदेनं प्रार्थत्वात् पूर्व नयनकरिकलभवत् पेषु पतिरूपणे किं कुर्वद्भिः कीचकैः कूजद्भिः ॥४२॥ संस्कृतेति पवनो वा
युः तेन जानेषि षेवे सेवां चकार किं भूतः पवनः निरिति हृष्टैः तेनुचारैः हृतुः सेव धः पुनः किं भू॰ प॰ अनोकुहकम्पित पुष्पगंधिः अनोकुहा
नां वृक्षाणां आ ईषत् कंपितानि यानि पुष्पाणि तेषां गन्धो विद्यते यस्मिन् सः अनोकुहकंपित पुष्पगंधिः अथवा राजदेवताद्दिवत् आकंपिताये अ
नोकुहवृक्षास्तेषां यानि पुष्पाणि तेषां गंधो यस्मिन् सः किं॰ अनातपत्रं न विद्यते आतपत्रं छत्रं यस्य सः अनातपत्रस्तम॰ पुनः ॰ तं आचार
पूतं आचारेण पूतः पवित्रः आचारपूतः तं आचारपूतं ॥४३॥ शोभमेति तस्मिन् ऋगो महिरि रत्ने केरास्तिवनं अवगाहमाने सति एतत्रये
जातं किं तदाह वृष्टा विनापि दवाग्निर्दीवानलः शशामउपशांतः पुनः फलपुष्पवृद्धिः फलानां पुष्पाणां च वृद्धिः आसीत् पुनः
सत्वेषु प्राणिषु अधिकः व्याघ्रादिः प्राणी ऊने हीने मृगादिके प्राणिनं न ववाधे न पीडितवान् ॥ ४४॥ संचारेति मुने धेनुः पत्ते गस
चसूर्यस्य प्रभा निनयापगं तु प्रचक्रमे धेनुपत्ते निलयाय पहासू येपदे निलयाप त्तोयाः क्रदीनाते दीनमांते किं कृत्वा दिगंतरा
णि संचारपूतानि संचारेण पवित्राणि संचारपूतानि तानि किं॰ धेनुः पल्लवरागताम्रा पल्लवरागो मणि विज्ञेयस्य हत् आरा
त्सेके अथवा पल्लवा वृक्षकिसलयास्तेषां रागस्तद्वत्ताम्रा सूर्यप्रभापक्षेपितगेव ॥४५॥ ताडति मध्यमलोकपालो राजा तां
गां अन्वगत् पयो वध्नात् गतः किं भू॰ तां देवतां पिवतिथिं क्रियार्थां देवानां पितॄणां अतिथीनां च याक्रिया सा अर्थः प्रयोज
नं यस्याः सा तां देव॰ च पुनः सा धेनुः तेन साक्षाद्वभौ शुशुभे किं॰ तेन सतां मतेन सज्जनानां वल्लभेन का इव श्रद्धा इव श्रद्धाः किं॰
॰ श्रद्धाविधिना उपपन्ना सहिता ॥४६॥ स पल्वलोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौ किं॰ वि॰ वनानि पल्वलोत्तीर्णवराहयूथानि पल्व
लात् कर्द्दमप्रदेशात् उत्तीर्णानि वराहाणां यूथानि तानि पल्वलोत्तीर्णवराहयूथानि तानि॰ पुनः किं॰ तानि आवासवृक्षो
न्मुखबर्हिणानि आवासस्य स्थितेः वृक्षा तेषु उन्मुखाः बर्हिणो मयूरा येषु तानि आवासवृक्षोन्मुखबर्हिणानि तानि ॥ पुनः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र॰ टी॰ कि॰
२

किं॰ वनानि मृगाध्यासितशाड्वलानि मृगैरध्यासितानि शाड्वलानि नवतृणानि येषु तानि॥ पुनः किं॰ वनानि श्यामायमा
नानि श्यामायमाचरंतीति श्यामायमानानि तानि श्यामा॰ ॥१७॥ आपीनेति॰ गृष्टिः सकृत्प्रसूता धेनुः नरेन्द्रो राजा उभौ
अपि गताभ्यां वयोनाष्टेति पथं अलं च क्रतुः शोभां प्रापतुः गृष्टिः कस्मात् स्पष्टमे आपीनभारोद्वहनप्रयत्नात् आपीनस्य
ऊधसो भार आपीनभारस्तस्य उद्वहनं तस्य प्रयत्नः आपीनभारोद्वहनप्रयत्नस्तस्मात् नरेन्द्रः कस्मात् वपुषो गुरुत्वात्।
कापि गुरुत्वात् गुरुबो नरेन्द्रः इत्यपि पाठः किंभूताभ्यां गताभ्यां अंचिताभ्यां पूजिताभ्यां ॥१८॥ वशिष्ठेत्यादि॰ वनिता सुदक्षि
णा तं राजानं लोचनाभ्यां पपौ अत्यालोकनं पानमुच्यते अतस्तं पश्यति स्म इत्यर्थः किंभूताभ्यां लोचनाभ्यां इवोत्प्रेक्षे दा
ते उपोषिताभ्यां कृतोपवासाभ्यां किंभूता वनिता अनिमेषेषु न निमेषालसा पक्ष्मपंक्तिः अग्रपक्ष्मणां पंक्तिः श्रेणिर्यस्याः सा
निमेषालसपक्ष्मपंक्तिः किंभूतं तं वशिष्ठधेनोरनुयायिनं वसिष्ठस्य धेनुः वशिष्ठधेनुस्तस्याः वशिष्ठधेनोः अनुयायिनं
पश्चाद्गामिनं पुनः किंभूतं तं वनान्तात् आवर्तमानं आगच्छंतं ॥१९॥ पुरस्कृतेति॰ सा धेनुः तदंतरे विरराज तयोः राजरा
ज्ञ्योः अंतरं विचाले तदंतरं तस्मिन् तदंतरे किंवि॰ पार्थिवेन राज्ञा पुरस्कृता अग्रे कृता क्व वर्त्मनि मार्गे किंभूता सा
पार्थिवधर्मपत्न्या पार्थिवस्य धर्मपत्नी पार्थिवधर्मपत्नी सुदक्षिणा तया पार्थिवधर्मपत्न्या प्रत्युद्गता सन्मुखमागता धे
नुः का इव विरराज संध्या इव किंभूता संध्या दिनक्षपामध्यगता दिनं च क्षपा च दिनक्षपे तयोर्मध्यं दिनक्षपामध्यं तस्मिन्
गता दिनरात्रिमध्यगता ॥२०॥ प्रदक्षिणीति सुदक्षिणा तस्याः धेनोः शृंगान्तरं शृंगयोरन्तरं शृंगान्तरं तदं॰ आनर्च

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

जयामास किं० शृंगांतरं अर्धेसिद्धेः द्वारं इव किं कृत्वा आजर्चे तां पयस्विनीं धेनुं प्रदक्षिणीकृत्य च पुनः प्रणम्य प्रणा
मं कृत्वा किंभूता सुदक्षिणा साक्षतपात्रहस्ता सह अक्षतैस्तंडुलैर्वर्त्तते यत्तत् साक्षतं पात्रं हस्ते यस्याः सा साक्षतपात्रहस्ता।
पुनः किंभूतं शृंगांतरं विषाणांतरं विस्तीर्णं। २१। वत्सेति। सा धेनुः वत्सोत्सुकापि वत्साय उत्सुका वत्सोत्सुकापि स्तिमिता निश्चला
सती सपर्यां पूजां प्रत्यग्रहीत् अंगीचकार इति हेतोः तौ राजा राज्ञी च ननंदतुः हर्षं आपतुः हि यस्मात् कारणात् भक्त्योपपन्ने
षु तद्विधानां प्रसादचिन्हानि पुरःफलानि भवंति भक्त्या उपपन्ना युक्ताः भक्त्योपपन्नाः तेषु फलं भविष्यत् अग्रे अनंतरं भवतीति ज्ञा
यते।२२। गुरु इति। दिलीपः दोग्ध्रीं गां पुनरेव भेजे किं कृत्वा गुरोर्वशिष्ठस्य पादौ निपीड्य सेवयित्वा किंभूतस्य गुरोः सदा
रस्य सभार्यस्य किं कृत्वा समाप्य कृत्वा किं विशिष्टं विधिं सायंसंध्यायां अग्रे सायं संध्यां तु संध्य क दोहावसाने दोहस्य
अवसानं दोहावसानं तस्मिन् दोहावसाने किंभूतः दिलीपः भुजोच्छिन्नरिपुः भुजाभ्यां उच्छिन्ना रिपवो येन सः भुजो
च्छिन्नरिपुः किंभूतां दोग्ध्रीं निषण्णां।२३। तामं० गोप्ता राजा तां सुप्तां क्रमेण अनु पश्चात् स्वयमपि संविवेश अशयिष्ट
किं कृत्वा अन्वास्य सेवयित्वा किं० गोप्ता गृहिणीसहायः किंभूतां तां अंतिकन्यस्तबलिप्रदीपां अंतिके समीपे न्य
स्ताः स्थापिताः बलिनिमित्तं प्रदीपा यस्याः सा अंतिकन्यस्तबलिप्रदीपा तां अंतिकन्यस्तबलिप्रदीपां पुनर्गोप्ता राजा
जाग्रातः प्रभाते सुप्तोत्थितां गां प्रति स्वयमपि अन्वेदति एतत् पश्चात् बुध्यित।२४। इत्थं तस्य दिलीपस्य सप्ताहन्या
नि त्रिगुणानि एकविंशतिदिनानि व्यतीयुः व्यतिक्रांतानि किं कुर्वतस्तस्य इत्थं एवं उक्तप्रकारेण प्रजार्थं सेवता
नार्थं व्रतं पालयतः स मम हिषीपरिग्रहः सदक्षिणया सह किंभूतस्य तस्य महनीयकीर्तेः महनीया पूज्या

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नीयकीर्त्तिर्यस्य सः महनीयकीर्त्तिस्तस्य महनीयकीर्त्तेः किंभूतस्य तस्य दीनोद्धरणोचितस्य दीनानां उद्धरणं दी
3 नोद्धरणं तस्मिन् तस्य वा उचितौ योग्यः दीनोद्धरणोचितस्तस्य दीनोचितस्य ।२५। अन्येद्युः अन्येद्युः अन्यदा मुनिहो
मधेनुः गौरीगुरोः हिमाचलस्य गह्वरं गुफां आविवेश प्रविष्टा किं कर्त्तुकामा आत्तमातुं चरस्य भावं अभिप्रायं जिज्ञा
सा समानाः ज्ञातुकामा आत्मनः स्वस्य अनुचरः सेवकः आत्मानुचरः तस्य ॥ किंभूतं गह्वरं गंगाप्रपातान्त विरूढ
शष्पं गंगायाः प्रपातस्तटं तस्य अन्ते समीपे विरूढं उत्पन्नं शष्पं बालतृणं घासमित्यमरः प्रपातान्तविरूढशष्पं ।२६।
सद्यः सिंहः किल इति सत्येन तां गां चकर्ष गृहीतवान् किंभूतः सिंहः इति हेतोः नृपेण राज्ञा अलक्षितो ऽभ्युत्पतनं अलक्षितं अ
ज्ञातः अभ्युत्पतनं आगमो यस्य सः अलक्षिताभ्युत्पतनः किं विशिष्टेन नृपेण प्रसह्य बलात् अद्रिशोभाप्रहितेक्षणेन अद्रेः
शोभा अद्रिशोभा अद्रिशोभायां प्रहिते दत्ते ईक्षणे नेत्रे येन सः अद्रिशोभाप्रहितेक्षणस्तेन । इतीति किं सा गौः हिंस्रैः मनसा
सा विद्युः प्रधर्षी । २७ । तदीयेति तदीयं तस्याः धेनोः आक्रन्दितं आक्रमणं दुःखशब्दः नृपस्य दृष्टिं निवर्त्तयामास केषु इव र
श्मिषु आदाय इव यथा कोपि पुरुषः रश्मिभिः आकृष्य वृषभं निवर्त्तयति किंभूतस्य नृपस्य आर्त्तसाधोः आर्त्तेषु साधुः
आर्त्ते साधुः तस्य आर्त्तसाधोः किंभूतमाक्रन्दितं गुहानिबद्धप्रतिशब्ददीर्घं गुहायां निबद्धो यः प्रतिशब्दः तेन दीर्घं गुहानिब
द्धप्रतिशब्ददीर्घं तत् किंभूतां दृष्टिं नगेन्द्रसक्तां नगेन्द्रे हिमाचले सक्ता लग्ना नगेन्द्रसक्ता तां न ।२८। स पाटेति । स धनुर्द्धरः
केसरिणं सिंहं ददर्श दृष्टवान् किंभूतं केसरिणं गविधेनौ तस्थिवांसं किंभूतायां गवि वर्णतः पाटलायां स्वेतरक्ता तु पाट
ला तस्यां पाटलायां कस्यां कमिव सानुमतः गिरेः अधित्यकायां पर्वतोपरिभूमौ लोध्रद्रुमे इव किंभूतो अधित्यकायां धा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तुमयां। किंभूते लोध्रद्रुमे सप्रफुल्ले ।२८। ततइति। ततस्तदनंतरं नृपतिः दिलीपः निषंगात्तूणीरात् शरं उद्धर्तुं ऐच्छत् कस्मै मृ
गेंद्रस्य सिंहस्य वधाय किंभूतः नृपतिः मृगेंद्रगामी सिंहवत् गमनशीलः किंभूतस्य मृगेंद्रस्य वध्यस्य वधयोग्यस्य किंभूतः
नृपतिः शरण्यः शरणार्हः पुनः किंभूतः नृपतिः जाताभिषंगः जातोऽभिषंगो पराभवो यस्य सः जाताभिषंगः पुनः किंभूतः
नृपतिः प्रसभोद्धृतारिः प्रसभेण बलात्कारेण उद्धृता अरयः शत्रवो येन सः प्रसभोद्धृतारिः ।२९। वामेति। तस्य राज्ञः करो ह
स्तः सायकपुंखे एव लग्नांगुलिः सक्तांगुलिः एवं तस्थौ स्थितः इवोल्लिखते चित्रार्पितारंभः चित्रलिखित इव किंभूतः करः वा
मेतरः वामात् इतरो वामेतरो दक्षिणः किंभूतस्य तस्य प्रहर्तुः प्रहरणशीलस्य किंविशिष्टे सायकपुंखे नखप्रभाभूषितकंक
पत्रे नखानां प्रभा नखप्रभा तया भूषितः कंकपत्रो वाणो यस्मिन् सः। नखप्रभाभूषितकंकपत्रस्तस्मिन् नखप्रभाभूषित।
कंकपत्रे ।३०। बाहु० राजा दिलीपः स्वतेजोभिः अंतरदह्यत किंभूतैः तेजोभिः आगस्कृते सिंहे अप्रष्टशक्तिः आगः अपराधः
तत्करोतीति आगस्कृत् तस्मिन् आगस्कृते पुनः किंभूते आगस्कृते अभ्यर्णे समीपस्थे किंभूतः राजा बाहुप्रतिष्टंभविवृद्धमन्युः
बाहोः प्रतिष्टंभः स्तंभः तेन विवृद्धो मन्युः क्रोधो यस्य सः बाहुप्रतिष्टंभविवृद्धमन्युः करवारसत भोगी सर्प इव किंभूतः भो
गी मंत्रौषधिरुद्धवीर्यः मंत्रौषधीभिः रुद्धं वीर्यं यस्य स मंत्रौ०।३१। तमिति। सिंहः तं राजानं मनुष्यवाचा निजगाद किंभूतं।
आर्यैः गृह्यते भवः आर्यगृह्यस्तं आ० किंभूतः सिंहः निगृहीता धेनुर्येन सः निगृहीतधेनुः पुनः किंभूतं तं मनुवंशकेतुं म
नोर्वंशध्वजं सिंहः किं कुर्वन् तं विस्मापयन् किंभूतं राजानं आत्मवृत्तौ विस्मितं सिंहोरुसत्वं सिंहवत् उरु गरिष्ठं सत्वं साहसो यस्य स
सिंहोरुसत्वस्तं सिंहो०।३२। अलं० हे महीपाल हे राजन् तव श्रमेण अलं व्यर्थं यतः इतो मयि अस्मान्मत्तो वा प्रयुक्तमपि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र०टी०टि०
७

पारितं मणिचास्त्रं स्तम्भयामास तत् हेतुमाह मरुतस्तस्य वायोः रंहो वेगः त्रिलोक्यां येन मूर्छति किंभूतः रंहः पादपोन्मूलनशक्तिः पा
दपानां वृक्षाणां उन्मूलने शक्तिर्यस्य तत् पादपोन्मूलनशक्तिः ।३४। कैं० सिंहः राजानं प्रति किं आह तदाह हे राजन् त्वं मां अष्ट
मूर्तेरीश्वरस्य कुंभोदरं नाम किंकरं अवेहि जानीहि किं कत्तुं मित्रोः वृषभस्यारुरुक्षोः किंभूतस्य वृषस्य कैलाशगौरं कैलाशवत्
हिमांशुवत् गौरं शुभ्रं ।पुनः किंभूतं वृषं पादार्पणानुग्रहपूतपृष्ठं पादस्य अर्पणं पादार्पणं पादार्पणमेव अनुग्रहः पादार्पणानु
ग्रहस्तेन पूतं पवित्रं पृष्ठं यस्य सः पादार्पणानुग्रहपूतपृष्ठस्तं पादा० किंभूतं वृषं निकुंभतुल्यं निकुम्भोगणविशेषस्तेन तु
ल्यो निकुंभतुल्यस्तं ।३५। अमुं० हे राजन् त्वं अमुं देवदारुं पुरः अग्रे पश्यसि अमुं कं यो सो वृषभध्वजेन ईश्वरेण पुत्रीकृ
तः यः देवदारुः स्कंदस्य कार्त्तिकेयस्य मातुर्गौर्याः पयसां रसज्ञः रसं जानातीति रसज्ञः किंभूतानां पयसां हेमकुंभस्तन
विसृष्टानां हेमकुंभौ एव स्तनौ ताभ्यां निसृष्टानि निर्गतानि हेमकुंभस्तननिसृष्टानि तेषां हेमकुंभस्तननिसृष्टानां ।३६। कंडूये
ति। हे राजन् अस्य देवदारोः त्वक् कदाचित् वन्यद्विपेन वनोद्भवहस्तिना उन्मथिता किं कुर्वाणेन वन्यद्विपेन कटं कपोलं कं
डूयमानेन अयं अद्रेः तनया पार्वती एनं देवदारुं शुशोच कं स्वसेनान्यं कार्त्तिकेयं इव किंभूतं कार्त्तिकेयं असुरास्त्रैः असुर
प्रहरणैः आलीढं व्याप्तं ।३७। तदेति। तदा प्रभृत्येव तद्दिनादारभ्य अहं अचलमत्ता ईश्वरेण सिंहत्वं विधाय कृत्वा अस्मिन् अ
द्रिकुक्षौ व्यापारितः किमर्थं वनद्विपानां त्रासार्थं किंभूतोऽहं अङ्कागतसत्त्ववृत्तिः अङ्के उत्सङ्गे आगतानां प्राणिनां वृत्ति
र्यस्य सः अङ्कागतसत्त्ववृत्तिः ।३८। तस्यादिति। हे राजन् तस्य मे मम एषा गौः शोणितपारणा उपस्थिता शोणितेन एव पारणं
यस्याः सा शोणितपारणा कस्य केव यथा सुरद्विषो राहोः चान्द्रमसी कला इव चन्द्रमसः इयं चान्द्रमसी किंभूता एषा तृप्ति
तस्य तृप्त्यै अलं समर्था पुनः किं० एषा परमेश्वरेण प्रदिष्टः कालो यस्याः सा प्रदिष्टकाला ।३९। सत्वेति। हे राजन् ततः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सत्वेन लज्जां विहाय त्यक्त्वा निवर्त्तयस्व भवान् गुरोर्वशिष्ठस्य दर्शितशिष्यभक्तिः दर्शिता प्रकटिता शिष्यस्य शिष्यसेवं धिनी भक्तिर्ये
न सः दर्शितशिष्यभक्तिः यत् वस्तु शस्त्रेण अशक्यरक्षस्य स्यात् तत् शस्त्रभृतां यशः न क्षिणोति न नाशयति हे राजेन्द्र यत् रक्षेरक्ष
णीयं वस्तु शस्त्रेण आयुधेन तद्वस्तु शस्त्रभृतां क्षत्रियाणां यशः कीर्त्तिं न क्षिणोति न स्फोटयति न विनाशयतीत्यर्थः ।४०। इति
पुरुषाधिराजो राजा दिलीपः आत्मनि अवज्ञां समीपस्थमपरिं निवारयितुं असमर्थः स्वेच्छरूपां शिथिलीचकार किं कृत्वा मृ
गाधिराजस्य वचो वचनं निशम्य श्रुत्वा किं भूतं वचः इत्थं पूर्वोक्तप्रकारेण प्रगल्भं किं भूतः पुरुषाधिराजः प्रत्याहतास्त्रः प्रति
हते अस्त्रे यस्य स प्रत्याहतास्त्रः कस्मात् गिरिशप्रभावात् गिरिशस्य ईश्वरस्य प्रभावो गिरिशप्रभावस्तस्मात् गिरिशप्रभावा
त् ।४१। प्रत्येति अथ पुनः राजा एनं सिंहं अब्रवीत् किं भूतो राजा इषुप्रयोगे वितथप्रयत्नः वितथो निःफलः प्रयत्नः प्रयासो
यस्य सः वितथप्रयत्नः किं भूते इषुप्रयोगे तत्पूर्वभंगे स एव पूर्वः भंगो यस्य सः तत्पूर्वभंगस्तस्मिन् तत्पूर्वभंगे केन कं इ
व वितथप्रयत्नः कैनेत्याह यथा वज्रपाणिः इंद्रः त्र्यंबकवीक्षितेन ईश्वरविलोचनेन जडीकृतः किं कुर्वन् मुमुक्षन् इंद्रः वज्रं मुमु
क्षन् मोक्तुं इच्छन् ।४२। संरुद्धेति अथ राजा प्राह हे मृगेन्द्र हे सिंह अहं यत् वचः विवक्षुर्वक्तुमिच्छुः तत्कामं अतिशयेन हा
स्यं हास्यजनकं किं भूतो हं संरुद्धचेष्टः संरुद्धा चेष्टा यस्य सः संरुद्धचेष्टः स्तंभितदेहसामर्थ्यः हि यस्मात्कारणात् भवान् प्राण
भृतां अंतर्गतं सर्वं वेद भावं वेत्ति अतो हं अभिधास्ये ।४३। मान्यः ० हे सिंह स मे मम मान्यः इज्यः किं भूतः सः स्थावरजंगमानां
पदार्थानां सर्गस्थितिप्रत्यवहारहेतुः सर्गः सृष्टिः स्थितिः पालनं प्रत्यवहारः संहारः सर्गश्च स्थितिश्च प्रत्यवहारश्च सर्गस्थि
तिप्रत्यवहारास्तेषां हेतुर्निमित्तं गुरोरपि पुरस्तादग्रे इदं गोरूपं धनं नश्यत् सत् अनपेक्षणीयं न स्यात् किं भूतस्य गुरोः आ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हितान्नेः अग्निरेतुः ।४४। स त्वं इति। हे सिंह स त्वं मदीयेन देहेन शरीरेण वृत्तिं आजीविकां निर्वर्तयितुं प्रसीद प्रसादं कुरु महर्षेर्वशि
5 ष्ठस्य इयं धेनुर्विमुच्यतां किंभूता धेनुः दिनावसानोत्सुकबालवत्सा दिनस्य अवसानं दिनावसानं तस्मिन् उत्सुको बालवत्सो यस्याः
सा दिनाव०।४५। अथेति। अथ स मृगपतिः राजानं प्रति भाषे भूतेश्वरस्य ईश्वरस्य पार्श्ववर्त्तितुं शीलमस्य भूतेश्वरपार्श्ववर्ती ईश्वरसे
वकः किं कुर्वन् स्वभावे गिरिकंदराणां पर्वतगुहानां अंधकारं दंष्ट्रामयूखैः दंष्ट्राकिरणैः शकलानि खंडशः कुर्वन् ।४६। एकेति। सिंह
हे राजन् त्वं मम अविचारमूढः प्रतिभासि विचारे विचारणायां मूढः विचारमूढः किं कुर्वन् अल्पस्य हेतोः बहु प्रचुरं हातुं त्यक्तुं
इच्छन् किं किं बहु इत्याह जगतः प्रभुत्वं किंभूतस्य जगतः प्रभुत्वं एकातपत्रं एकं आतपत्रं यस्मिन् तत् एकातपत्रं एकच्छत्रमित्यर्थः
च पुनः नववयः नवं वयः पुनः इदं कांतं रम्यं ।४७। भूतेति। सिंहो वक्ति हे राजन् किंभूता दया शरीरत्यागहेतुः न ता गुरु भाति इति पक्षद्वयं
अनुक्रमेण एकाक्षे हृदयेन परिजिहीर्षुराह भूता० हे राजन् त्वं यदि तव भूतेषु दया भूतदया तर्हि इयं एका गौः स्वस्तिमती कल्या भूत
लिनी भवेत् कसति त्वदंते तव अंते त्वदंते तव नाशे सति त्वं पुनः जीवन् प्राप्यत् निरंतरं उपद्रवेभ्यः प्रजाः पाहि रक्ष इति हे प्रजाना
थ केवल पिता इवा ।४८। अथैक० द्वितीयपक्षं प्राह अपत्यैः गुरोः अपराधदंडात् बिभेषि किंभूतस्य गुरोः एकधेनोः एका एव धेनुर्य
स्य सः तस्य० कच्चिदपराधदंडाद्विभेषि भावः किं० अपराधदंडात् त्वत्तः अनुप्रतिमिव मातः अग्नितुल्यात् तदा अस्य गुरोः मन्युः क्रोधः
भवता त्वया विनेतुं शक्यः किं कुर्वता त्वया कोटिशो गाः स्पर्शयता ददता किं० गाः घटोध्नीः घटवत् ऊधो यासां ताः घटोध्नीः स्ताघ
टोध्नीः ।४९। तदिति। तत्तस्मात्कारणात् त्वं आत्मदेहं स्वकायं शरीरं रक्ष किंभूतं आत्मदेहं कल्याणपरंपराणां भोक्तारं पुनः किं० आ
त्म० ऊर्जस्वलं तेजस्विनं ह्रियतः [illegible] ऊः किंभूतमैंद्रं पदं महीतलस्पर्शनमात्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भिन्ने महीतलस्पर्शनमात्रेण भिन्नेनान्यः कोपि मे दद्यतीति भावः ॥५०॥ एतावत् एतावत्तं नृपमालमनुक्त्वा मृगेन्द्रे सिंहे विरते सति
शैलोच्चयोपि हिमाचलपर्वतोपि तं क्षितिपालं राजानं प्रति उच्चैः उच्चैः स्वरेण प्रीत्या तमेव अर्थं सिंहोक्तमेव परमार्थं इवो स्तते
अभाषत प्रतिस्वनेन प्रतिशब्देन किंभूतेन प्रतिस्वनेन आत्मगुहागतेन आत्मनः स्वस्य स्थिते गुहा तस्यां गतः प्राप्तः आत्मगुहा
गतस्तेन ॥५१॥ निशम्येति । मनुष्यदेवो दिलीपः पुनः अपि उवाच किं कृत्वा देवानुचरस्य वाचं निशम्य कथंभूतो मनुष्यदे
वः धेन्वा निरीक्ष्यमाणः किंभूतया धेन्वा तदध्यासितं तस्य सिंहस्य अध्यासितं आक्रमणं तेन कातरे अक्षिणी यस्याः सा तदध्यासि
तकातराक्षी तया । किंभूतो दिलीपः सुतरां अतिशयेन दयालुः कृपावान् ॥५२॥ क्षतेति । हे देवसेवक इति शब्दः क्षत्रः ततो गोरक्षणे
एव सार्थकः स्यात् नान्यथा कृत्ये न किं न किमपि कस्य तद्विपरीतवृत्तेः तस्मात् त्राणात् विपरीता वृत्तिर्यस्य सः तद्विपरीतवृत्तिः तस्य तद्विपरी
तवृत्तेः अथवा तद्विपरीतवृत्तेः प्राणैः किं न किमपि किंभूतैः प्राणैः उपक्रोशमलीमसैः उपालंभमलिनैः ॥५३॥ कथं० हे सिंह महर्षेर्वशि
ष्ठस्य अनुनयः प्रभावः अन्यपयस्विनीनां अन्यधेनूनां विश्राणनात् दानात् न शक्यः अपि तु न पुनः त्वं इमां गां सुरभेः कामधेनोः अनू
नां असदृशीं अवेहि जानीहि ततः सिंहः प्राह तर्हि एतत् अमाया अपि मया कथं गृहीता तत्राह हे सिंह अस्यां गवि त्वया रुद्रस्य ईश्वरस्य तेजसा व
लेन प्रहृतं प्रहारो दत्तो न तु निजबलेन ॥५४॥ सेयमिति । हे सिंह सा इयं धेनुः मया भवतः त्वत्तः मोचयितुं न्याय्या युक्ता केन स्वदेहार्पणनिः
क्रयेण मदीयदेहदानेन मोल्येन एवं च कृते सति तव पारणा विहता स्यात् मुनेर्वसिष्ठस्य क्रियार्थोपि अनुपातमभवेत् ॥५५॥ भवा० हे सिंह भ
वानपि त्वमपि इदं अवैति किंभूतो भवान् परवान् परवशः हि यतः तव देवदारौ महान् यत्नः यदि मया अपि रक्षितव्यं वस्तु विनाश्यं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र॰टी॰द्वि॰ ६

6

तियो कुर्भर्तुरग्रे स्थातुम् अयुक्तं किं विहीनेन मयात्मवयं अक्षतेन ॥५६॥ किमपि० हे सिंह चेत् यदि अहं तव किमप्यहिंस्यो मतस्तदा मे मम यश
शः शरीरे दयालुः भव खलु निश्चितं मद्विधानां मदृशानां पिंडेषु अनास्था अनादरो वर्त्तते किं भूतेषु पिंडेषु कांतिविध्वंसिषु एकान्ते
न निश्चयेन विध्वंसो वर्त्तते येषु एकांतविध्वंसिनः तेषु एकांतविध्वंसिषु किं भूतेषु पिंडेषु भौतिकेषु पंचभूतमयेषु ॥५७॥ संबंधइत्याहेति सिं
ह नौ आवयोः संबंधो हतो जातः किं भूतयोः मैत्रीवनांतसंगतयोः मिलितयोः संबंधं बुधाः आभाषणपूर्वं आहुः कथयंति आभाषणपूर्वं आलाप
रस्परं आलापः पूर्वो यस्मिन् स आभाषणपूर्वस्तं आभाषणपूर्वं तत् तस्मात्कारणात् हे भूतनाथानुगृहे ईश्वरसेवक त्वं मे मम संबंधि
नः प्रणयं विहंतुं खंडयितुं न अर्हसि न योग्यो भवसि ॥५८॥ तथेति स दिलीपः स्वदेहं स्वशरीरं हरये सिंहाय उपानयत् अढौकयत्
किमिव आमिषस्य मांसस्य पिंडमिव किं कुर्वन् हरये तथा इति अंगीकृत्य स तां धेनुं मुक्तवंते किं भूतो दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः स
द्यः शीघ्रं प्रतिष्टंभात् विमुक्तो बाहुर्यस्य सः सद्यः प्रतिष्टं० किं भूतः दिलीपः न्यस्तशस्त्रः न्यस्तसंशस्त्रं येन सन्यस्तः ॥५९॥ तस्मिन्
उत् प्रस्तावे प्रजानां पालयितुः सिंहनिपातं सिंहस्य निपातं उग्रं पश्यतः उत्पत्तीमाणस्य किं भूतस्य प्रजानां पालयितुः अधोमुखस्य किं भू
ता पुष्पवृष्टिः विद्याधरहस्तमुक्ता विद्याधरेण हस्तेन मुक्ता विद्याधरहस्तमुक्ता ॥६०॥ उत्तिष्टेति राजा दिलीपः स्वाजननी इव स्वमातरं
इव अग्रतो गां ददर्श परं न सिंहं किं भूतां गां प्रस्रवविलीं प्रस्रवैः क्षीरक्षरणैः यस्याः सा प्रस्रवविलीं किं भूतः सन् उत्तजा इति
वचो निशम्य श्रुत्वा उत्थितः सन् किं भूतं वचः अकस्मात् प्रादुर्भूतं इति किं हे वत्स त्वं उत्तिष्ट किं भूतं वचः अमृतायमानं अमृते
न तुल्यं ॥६१॥ तं विस्मि० धेनुः तं दिलीपं उवाच किं भूतं विस्मितं आश्चर्यसहितं किं उवाच इति आह हे साधो त्वं मया परीक्षितोसि किं कु र॰म॰ ६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

त्वा मायां उज्झाध्य मायांप्रकटीकृत्य मयि अंतकोपि यमोपि प्रहर्तुं मारयितुं न प्रभुर्न समर्थः अन्यहिंस्रोः सिंहादयः किमुत किं प्रह
र्तुं समर्था इत्यर्थः कस्मात् गुरुप्रभावात् गुरोर्वशिष्ठस्य प्रभावात् किंचित् कुतः शिष्यप्रभावात् इत्यपि पाठः ॥६२॥ भक्त्या हे पुत्र तेन तव अहं प्रीता
ऽस्मि संतुष्टाऽस्मि कया गुरौ विषये भक्त्या च पुनः मयि विषये अनुकंपया अथ वरं वृणीष्व अथवा पुत्र वरं रहयोरेकं वद त्वं मां केव
लानां पयसां दुग्धानां प्रसूतिं उत्पादयित्रीं न अवेहि न जानीहि किंतु प्रसन्नां सतीं मां कामदुघां जानीहि मनोवांछिते दुग्धे प्ररयंती
ति कामदुघा तां कामदु· ॥६३॥ ततः स राजा ततः सुदक्षिणायां तां धेनुं इति अध्याहारः द्विकर्मकत्वात् धातोः तनयं ययाचे किं कृत्वा हस्तौ
समानीय संयोजयित्वा किंभूतो राजा मानितार्थी पुनः किं· राजा स्वहस्तार्जितवीरशब्दः स्वहस्तेन अर्जितः उपार्जितो वीरशब्दो येन
स स्वहस्तः· किंभूतं तनयं वंशस्य कर्तारं पुनः किंभूतं तनयं अनंतकीर्तिं अनंता कीर्तिर्यस्य सः अनंतकीर्तिस्तमनंतकीर्तिं ॥६४॥
संताने। सा पयस्विनी गौः तं राजानं इति आदिदेश आदेशं ददौ इतीति किं हे पुत्र त्वं मदीयं पयः पुटे दुग्ध्वा उपभुंक्ष्व किं कृत्वा राज्ञे त
था इति कामो वांछां प्रतिश्रुत्य पुत्रोस्तु इति अंगीकृत्य किंभूताय राज्ञे संतानकामाय ॥६५॥ वत्सस्य· राजा प्राह। हे मातः अहं तव औध
स्यं दुग्धं उपभोक्तुं इच्छामि वरं किं कृत्वा ऋषेर्वशिष्ठस्य अनुज्ञां अधिगम्य प्राप्य किंभूतं औधस्यं वत्सस्य च पुनः होमार्थविधेः शेषं कः क
इव षष्ठांश उर्व्याः पृथिव्याः षष्ठांशं राजा भुंक्ते किंभूताया उर्व्याः रक्षिताया भव्यरीत्या प्रतिपालिताया ॥६६॥ इत्थं· वशिष्ठधेनुः प्री
ततरा बभूव किंभूता धेनुः कुक्षेः गुहायाः आश्रमे आश्रमे एण श्रमविनाश्रमत्वा ययौ किंभूतायाः कुक्षेः हैमवतात् हिमवतः अयं
हैमवतः तस्मात् हैमवतात् ॥६७॥ तस्याः नृपाणां गुरुः दिलीपः तस्याः कामधेनोः प्रसादं गुरवे शशंस कथयामास कया वाचा
वचनेन इवोस्मैदाते पुनरुक्तया किंभूतं प्रसादं प्रहर्षचिह्नानुमितं प्रहर्षचिह्नेन सर्वैः अनुमितं ज्ञातं अत एव पुनरुक्तवाचा इव किं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

७ कृत्वा सर्वं गुरवे वशिष्ठाय निवेद्य कथयित्वा किंभूतो राजा प्रसन्नेंदुमुखः प्रसन्नेंदुवत्स्वच्छवत् मुखं यस्य स प्रसन्नेंदुमुखः ।९१। स इति स
7 राजा दिलीपः नंदिनीस्तन्येदुग्धं पपौ किंभूतो राजा अनिंदितात्मा न निंदितः आत्मा यस्य स अनिंदितात्मा पुनः किंभूतो राजा सद्वत्सल
र :सत्सु उत्तमेषु वत्सलः किंभूतं स्तन्यं वत्सनिपीतशेषं वत्सेन निपीतं वत्सनिपीतं तस्मात् शेषं वत्सनिपीतशेषं तत् पुनः किंभूतो
राजा वशिष्ठेन कृताभ्यनुज्ञः कृता अभ्यनुज्ञा यस्य सः कृताभ्यनुज्ञः दत्तादेश इत्यर्थः श्वो स्नेदाते अतितृष्णः अतितृषितः सन्
भूयो द्वितीयवारं शुभ्रं यशः यथा कश्चित् ऊनावशेषमिति पिपासुः कश्चिद्यशो मूर्त्तमिवेति पाठः ।९२। प्रातर्यथ इति । वशिष्ठः प्रातः
तौ दंपती स्वां राजधानीं प्रति संप्रेषयामास किंभूतो वशिष्ठः वशी जितेन्द्रियः किं कृत्वा संप्रेषयामास स्वस्त्ययनं प्रयुज्य स्वस्ति अयनं प्रापणं स्वस्त्य
यनं मंगलाशिषं दत्वा किंभूतं प्रास्थानिकं प्रस्थानाय अर्हं योग्यं प्रास्थानिकं कदा प्रातः यथोक्तपारणान्ते यथोक्तं यद्व्रतं यथोक्तव्रतं तस्य पारणं तत्
स्य अन्ते ते कृते ॥९३॥ प्रदक्षिणीति ॥ नृपः प्रतस्थे चचाल चलितः किं कृत्वा हुताशनं अग्निं प्रदक्षिणीकृत्य किंभूतं हुताशनं ज्वलितं तदनंतरं हो
तारं च पुनः अरुंधती वशिष्ठभार्यां ततो धेनुं किंभूतां धेनुं सवत्सां वत्ससहितां किंभूतः नृपः सन्मंगलोदग्रतरानुभावः सत् मंगलेन प्रदक्षिणी
करणादिना समुत्पन्नेन चतुरतरः अधिकतरः अनुभावः प्रभावो यस्य सः सन्मंगलोदग्रतरानुभावः ।९४। श्रोत्रा॰ स हिष्णुः सहन
शीलो राजा दिलीपः ययौ केन रथेन किंभूतेन रथेन श्रोत्राभिरामध्वनिना श्रोत्रयोः अभिरामो ध्वनिर्यस्य सः श्रोत्राभिरामध्वनि
तेन श्रो॰ किंभूतो राजा धर्मपत्नीसहितः धर्मपत्न्या सहितः धर्मपत्नीसहितः पुनः किंभूतेन रथेन मार्गे अनुद्घातसुखेन अनुद्घा
तैः अस्खलितेन सुखयतीति अनुद्घातसुखस्तेन अ॰ इवोपेतेन स्वेन स्वकीयेन पूर्णमनोरथेन ।९५। तमाह॰ प्रजाः ताः राजानं ने
त्रैः पपुः असंतं आलोकयंति स्म किंभूतं तं प्रजार्थव्रतकर्शितांगं प्रजार्थं संतानार्थं निमित्तव्रतेन कर्शितं कृशीकृतं दुर्बलीकृतं अंगं य
स्य सः प्रजार्थव्रतकर्शितांगः तं अभिनवप्र॰ किं कुर्वद्भिर्नेत्रैः तृप्तिं अनाप्नुवद्भिः राजानं केभिः नवप्रजाः नृपतिं स्म इत्याह । अप्रावधीनो नाथ ७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

र.टी.द्वि
८

४

इव चंद्रं तं किंभूतं ओषधीनां नाथं नवोदये द्वितीयायां ॥७३॥ पुरः स दिलीपः पुनः धुरं भारं भुजे आससंज अर्पितवान् किं कृत्वा पुरं नग
रं प्रविश्य किंभूतः स राजा पुरंदरश्रीः पुरंदरस्य इंद्रस्य इव श्रीर्लक्ष्मी र्यस्य सः पुरंदरश्रीः किंभूतं पुरं उत्पताकं उत् ऊर्ध्वं पताका यत्रा
त् उत्पताकं किंभूतः सः पौरैः नगरलोकैः रभिनंद्यमानः किं भुजे भुजगेंद्रसमानसारे भुजगेंद्रेण समानं सारं बलं यस्य सः भुजगानां इंद्रः
भुजगेंद्रः भुजगेंद्रेण समानं सारं बलं यस्य स भुजगेन्द्रसमानसारः तस्मिन् भुजगेंद्रसमानसारे ॥७४॥ अथ अथानंतरं राज्ञी सुदक्षि
णा गर्भं आधत्त वभार कस्मै नरपतिकुलभूत्यै नरपतेः कुलं नरपतिकुलं तस्य भूतिः नरपतिकुलभूतिः तस्मै क का कमिव यथा द्यौः आ
काशं अत्रेर्नयनसमुत्थं ज्योतिः चंद्रं धत्ते सुरसरित् गंगा ऐशं तेजो विभर्त्ति ईश्वरस्य तेजः ऐशं किं तेजः वह्निनिष्ठ्यूतं वह्निनाभू
यस्त्वान्निष्ठ्यूतं वांतं वह्नौ वह्निना पिष्ठ्य त्यक्त्वा दत्तं न भोगं गां जगाह भगीरथः सुतोजस्ते इति श्रुतिः किंभूतं भं लोकपालानुभावैः
गुरुभिः अभिनिविष्टं गुरुभिर्विशिष्टैः लोकपालानुभावैः अभिनिविष्टं व्यापितं इंद्रादिलोकपालानां अंशैः गर्भोत्पत्तिस्मात् ॥७५॥ ॥
इति श्रीरघुवंशे महाकाव्ये कृता समयसुंदरैः अर्थालापनिका वृत्तिः स्वर्णा सर्गे द्वितीयके ॥२॥ इति श्रीचारित्रवर्द्धनविरचितायां राघवीयटीकायां
द्वितीयः सर्गः समाप्तिमगात् ॥२॥ २॥ ॥२॥ ॥२॥ ॥२॥ ॥२॥ ॥२॥ ॥२॥ ॥२॥ ॥२॥ ॥२॥

रा.म.
८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ८२९८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative